उदाहृतः" या० स्मृ० । "पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्" गीता । "वासुदेवो वृहद्भानुरादिदेवः पुरन्दरः" विष्णुस० "आदिः कारणं देव इत्यादिदेवः दानादिगुणवान् वा" भा० "देवोदानात्दीपनात् भवतीति"यास्कोक्तदेवशब्दनिरुक्तिमाश्रित्य भाष्ये तथोक्तम् ।

**आदिदैत्य** पु० कर्म्म० । हिरण्यकशिपौ दैत्ये तस्य दितेः प्रथमजत्वात्तथात्वम् । "एक एव दितेः पुत्रः हिरण्यकशिपुः पुरा" भा० आ०प०६५अ० । आदिदैत्योमहावीर्य्यो हिरण्यकशिपुः पुरा" भा०व०प० १०४ अ० ।

**आदिन्** त्रि० अत्तीति अद–णिनि । भक्षके । स्त्रियां ङीप् ।

**आदिनव** पु० आदीनवस्य पृ०वेदे ह्रस्वः । आदीनशब्दार्थे "आदिनवं प्रतिदीव्ने घृतेनास्माँ अभिक्षर" अथ०७,११०,४ ।

**आदिपर्व्वन्** न० आदि आद्यं पर्व्व । महाभारतान्तर्गते आद्ये पर्वणि ।"इत्येतदादिपर्वोक्तं प्रथमम्बहुविस्तरम्"भा०आ०।

**आदिपुराण** न० आदि आद्यं पुराणम् कर्म्म० । पुराणभेदे सर्वेषामष्टादशानां पुराणानामुपपुराणानाञ्चादिभूते चतुर्लक्षात्मके ब्रह्मनिर्म्मिते पुराणभेदे । नारदपुराणे उपसंहारपादशेषे मरीचिं प्रति ब्रह्मवाक्यम् "अष्टादशमनौपम्य सारात् सारतरं द्विज ! । ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते ।तदेव व्यस्य गदितमत्राष्टादशधा पृथक् । पाराशर्य्येण मुनिना सर्वेषामपि मानद" । वस्तुग्रहाय तेनैव मुनीनां भावितात्मनाम् । मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे । मुनयो धर्मशीलास्ते दीनानुग्रहकारिणः । मया चेदं पुराणन्तु वसिष्ठाय पुरोदितम् तेन शक्तिसुतायोक्तं जातूकर्णाय ते न च । व्यासोलब्ध्वा ततश्चैतत् प्रभञ्जनमुखोद्गतम् । प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम्" तथा च व्यासोक्तब्रह्माण्डन्तु द्वादशसाहस्रं तस्यैव संक्षेपार्थप्रतिपादकम् । एवञ्च तस्यैव चतुर्लक्षात्मकस्य सर्वपुराणमूलतया आद्यत्वात् आदिपुराणत्वम् । देवलोके तु आदिपुराणस्य शतकोटिश्लोकात्मकता यथोक्तं तत्रैव । प्रथमपादे मरीचिं प्रति ब्रह्मवाक्यम् । "शृणु वत्स ! प्रवक्ष्यामि पुराणानां समुच्चयम् । यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम् । पुराणमेकमेवासीत् सर्वकल्पेषु मानद ! । चतुर्वर्गस्य वीजञ्च शतकोटिसुविस्तरम् । प्रवृत्तिः सर्वशास्त्राणां पुराणोदभवत्ततः । कालेन ग्रसनं दृष्ट्वा पुराणस्य महामतिः । हरिर्व्यासस्वरूपेण जायते च युगे युगे । चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा । तदष्टादशधा कृत्वा भूर्लोके निर्दिशत्यपि । अद्यापि देवलोके तु शतकोटिसुविस्तरम् अस्त्येव तस्य सारस्तु चतुर्लक्षेण वर्ण्यते" एवञ्च तदानीं लोकप्रसिद्धचतुर्लक्षात्मकस्य ब्रह्माण्डनामकपुराणान्तरस्यैव व्यासप्रणीत चतुर्लक्षात्मकाष्टादशपुराणानामादिभूतत्वादादिपुराणत्वेन प्रसिद्धमासीत् । तच्च क्रमशउच्छिन्नप्रायं संप्रति शालायान्तु तस्य स्वल्पांशमात्रस्य सत्त्वेऽपि सर्वांशस्य प्रायशः कुत्रापीदानीमलाभात् न तत्तत्प्रतिपाद्यविषया वर्णयितुं शक्याः । हेमाद्रि माधवादिभिरादित्यपुराणनाम्ना बहूनि वचनानि लिखितानि । तेषां काले च तत्पुराणस्य प्रचार आसीत् क्रमश इदानीमुच्छिन्नप्रचारतया समग्रलाभासम्भवः इति तत्तत्प्रतिपाद्यविषयप्रदर्शनादुपरतमस्माभिः ।

**आदि(पु)पूरुष** पु० आदौ पुरि देहे वसति वस–डषन् स्वेनात्मना पूरयति जगत् पूर–उषन् वा पृ०वा ह्रस्वः । आदिजीवे १हिरण्यगर्भे २नारायणे च । "ते च प्रापुरुदन्वन्तं बुबुधे चादिपु(पू)रुषः"रघुः ।"दैत्येश्वरसभां गत्वा पार्ष्णिं संस्पृश्य पाणिना । दैत्यानामादिपुरुषः सुरारिर्दितिनन्दनः" भा०व०प०२७१अ० । ह्रस्वाभावे पूरुषोऽप्यत्र "तमर्घ्यमर्घादिकयादिपूरुषः" माघः ।

**आदिभव** पु० आदौ भवतीति भू–अच् । १हिरण्यगर्भे "हिरण्यगर्भःसमवर्त्तताग्रे" इति श्रुतौ तस्याग्रभवत्वोक्तेः तथात्वम् । २सर्व्वस्यादिः कारणं भवति । सर्व्वस्य कारणभूततयाविर्भूते ३विष्णौ च "रसातलादादिभवेन पुंसा" रघुः ४अग्रजमात्रे त्रि० ।

**आदिम** त्रि० आदौ भवः आदि+डिमच् । आदौ भवे ।

**आदिमत्** त्रि० आदिरस्त्यस्य मतुप् स्त्रियां ङीप् । आदियुक्ते १सकारणे २ आदिसीमायुक्ते च ।

**आदिराज** पु० आदिराद्योराजा टच् समा० । पृथुनामके नृपतौ तस्य राज्ञामादित्वात्तथात्वम् तत्कथा भाग०४स्क० "अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः । बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत । तद्दृष्ट्वा मिथुनं जातविस्मया ब्रह्मवादिनः । ऊचुः परमसंतुष्टा विदित्वा भगवत्कलाम् । एष विष्णोर्भगवतः कला भुवनपालिनी । इयञ्च लक्ष्मीसंभूतिः पुरुषस्यानपायिनी । क्षत्रियः प्रथमो राज्ञां पुमान् प्रथयिता यशः । पृथुर्नाम महाराजोभविष्यति पृथुश्रवाः" । तस्य वेणस्येत्यर्थः ।

**आदिवराह** पु० आदिराद्यो वराहः । यज्ञवराहरूपेणाविर्भूते विष्णोरवतारभेदे तत्कथा "ततो महात्मा मनसा दिव्यं रूपमचिन्तयत् । किं तु रूपमहं